THE M. S. UNIVERSITY ORIENTAL SERIES: NO. 3

PRAMĀṆAMAÑJARĪ

Critically Edited by

Dr. (Miss) Priyabala Shah,
M.A., Ph.D., (Bom.), D Litt. (Paris)

ORIENTAL INSTITUTE,
BARODA

The M. S. University Oriental Series

General Editor

G. H. Bhatt,

Director, Oriental Institute,

No. 3

PRAMĀṆAMAÑJARĪ

Critically Edited by

Dr. (Miss) Priyabala Shah,

M. A., Ph.D., (Bom.), D.Litt (Paris)

Head of the Department of Ancient Indian Culture,
Rāmānanda Mahāvidyālaya, Ahmedabad.

Oriental Institute,

BARODA

1958

PRAMĀṆA-MAÑJARĪ

INTRODUCTION

Critical Apparatus

The text edited here is based upon a single Ms. in the possession of the Hemacandrācārya Jaina Bhaṇḍāra at Pāṭaṇa. I undertook to edit it because it gives interesting details about the construction of residential houses—a thing rare in Sanskrit works on Śilpaśāstra.

Ms. No. 12866
Name—Pramāṇamañjarī
Author—Malla
Folios—1 to 14
Size—11″ × 5″
Each page contains 11 lines and each line contains 37 or 38 letters.
Script—Devanāgarī
Language—Sanskrit
Date (of the Ms.)—Saṃvat 1945 Mārgaśira Śudi 5 (*i.e.* 8-12-1888 A.D.)

Begins—ॐ नमः ॥ श्रीविश्वकर्मणे नमः । श्रीगुरुगणेशभारतीभ्यो नमः । विरञ्चिविश्वेश्वरविष्णुमूर्तिं विनायकं विघ्नहरं गभस्तिम् । श्रीभारतीं श्रीत्वरितां सदैव श्रीविश्वकर्माणमहं नमामि ॥ १
अथोच्यते सारतरस्य सारं काष्ठोदयालिन्दसमुद्भवन्तम् ।
मानं समस्तं **जय**वीक्षदृष्टं सुशिल्पिकं सर्वजनोपकृत्यम् ॥ २

Ends—**प्रमाणमञ्जरी** सेयं नाम्ना सर्वोपकारिणी ।
यस्या विज्ञानमात्रेण बुद्धिहीनोपि सिध्यति ॥ ३०८
श्रीमुञ्जभोजान्वयभानुभूपप्रसादपात्रं नकुलाभिधानः ।
शिल्पीसुतस्तस्य चकार शास्त्रं मल्लाभिधः सत्क्रियते नितान्तम् ॥ ३०९.
इति श्रीसूत्रधारमल्लविरचिता प्रमाणमञ्जरी संपूर्णा ॥

Colophon—सं. १९४५ ना मार्गशिर शुदि ५ । लि । प । हिंमतविजय ॥ श्रीशिल्पग्रन्थोऽयं ॥ पाट्टणनगरे

Text—While preparing the text I found many obscure and unintelligible readings. The Sanskrit of the text though on the whole correct is the Sanskrit of the artisan class. So the task of preparing a correet version of the text became difficult, but I had the privilege of studying the work under Śrī Muni Kalyāṇavijayajī who is not only an authority on the ancient Śilpaśāstra but is also familiar with its practice. He was good enough to correct and suggest many new readings.

The title of the text—In verse No. 308 the work is called Pramāṇa-mañjarī.[1]

---

[1] A work called Parimāṇamañjarī or Kāṣṭhamāpasaṃgraha was edited by Gosai Nārāyaṇabhāratī Yaśawantabhāratī of Pāṭaṇa and published by Mahādeva

Date and authorship—The name of the author of the work is mentioned in the colophon as Śrīsūtradhāra-Malla. In the last verse of the text he is referred to as Śilpī—by name Malla, son of Nakula. This Nakula is described as 'Śrī Muñjabhojānvayabhānubhūpaprasādapātraṃ.' This Śloka has been translated by Nārāyaṇabhāratī as 'the favourite of the king in Muñja-Bhoja, who is like the sun amongst the other kings on account of his royal power.'[1] The publisher identifies Muñja-Bhoja with the Muñja-Bhoja of Dhārā. If this interpretation were correct, we could place Malla in the 11th[2] century A. D. But it is not so. The proper translation of the line would be as follows :—

"Nakula, favourite of king Bhānu of the dynasty of Śrī Muñja and Bhoja".

This, however gives rise to the question as to who this Bhānu of Muñja-Bhoja dynasty is! There is no doubt that this Muñja-Bhoja dynasty is the Paramāra dynasty. More than one branch of Paramāra dynasty are known.[3] This Bhānu is said to belong to Muñjabhojānvaya because he must be in the direct succession of Muñja and Bhoja whether in the principal senior branch or a subordinate junior line. I have, however, found no reference to any king bearing the name Bhānu in the lists of the Paramāra dynasty.[4] This would suggest

Rāmacandra Jāguṣṭe in 1912 A.D. On comparison I found that it is an edition of Pramāṇa-mañjarī upto 247 verses plus the last verse mentioning the name of the author. Why Nārāyaṇabhāratī did not edit the remaining 61 verses cannot be known. He has also given a sort of summary in Gujarātī of those 247 verses, which is obscure and defective at many places. Any way the work is useful for comparison with our text.

What authority Nārāyaṇabhāratī has to call it Parimāṇamañjarī, we do not know. He might have called it by that name probably because the work gives the actual measurements and proportions of the different parts of a house and because the word generally used in this sense in Sanskrit is Parimāṇa. However, the word Pramāṇa given by our Ms. is not inappropriate because it has also the same sense of measurement. It appears that Nārāyaṇabhāratī must have got an incomplete Ms. and therefore he must have invented the title.

[1] "श्री एटले राजरिद्धिवाला बीजा राजाओमां सूर्यसमान एवा मुञ्जभोजनामा राजा तेहेना कृपानो पात्र नकुल नाम शिल्पी तेना पुत्र मल्लनामा शिल्पीए आ परिमाणमञ्जरी नामनो ग्रन्थ कर्यो." (पृ. ६८)

[2] History of the Paramāra dynasty (P. 108) by D. C. Ganguly.

[3] "Archaeological research has discovered the existence of some more branch-lines of the Paramāras, four in number, who held sway over the modern Banswara, Mount Abu, and the Jodhpur State, in Rājputānā." (P. 19)

—History of the Paramāra dynasty—Ganguly.

[4] The following books are consulted for the purpose.

(i) राजपुतानेका इतिहास of ओझा

(ii) ,, ,, ,, गेहलोत

(iii) History of the Paramāra dynasty—Ganguly.

that Bhānu must have belonged to some subordinate branch of the Paramāra family.

One thing that can, however, be said is that this Bhānu must have been a builder of monuments and therefore a patron of architects. If a guess is allowed, may I suggest the name of Udayāditya (1086 A. D.)[1], the builder of the famous temple Nīlakaṇṭheśvara of Udayapur in Bhilsā [2], as our Bhānu? In the word Udayāditya, Bhānu can be equated with Āditya because Sanskrit writers are known to be in the habit of putting synonyms for even proper names. But a genuine difficulty remains in this identification. In the name Udayāditya Āditya is only an appendage, and not the name proper.

So until we are able to identify satisfactorily the king Bhānu of the Bhoja-Muñja (Paramāra) dynasty, the question of the date of Malla and his Pramāṇamañjarī remains unsettled.

The earlier limit of the work, however, can be fixed with some definiteness. That it is later than Muñja-Bhoja (11th cent. A.D.) is obvious. In addition to

[1] History of the Paramāra dynasty (P. 142).

[2] "Udayapur Praśasti tells us that 'when that devotee of Bharga (Śiva *i. e.* Bhoja), whose brilliance resembled that of the sun, had gone to the mansion of the gods, the earth like Dhārā....Then arose king Udayāditya, as it were another sun, destroying the darkness of powerful foes, with the rays issuing from his sword,..." (P. 132)

तत्रादित्यप्रतापे गतवति सदनं स्वर्गिणां भर्गभक्ते व्याप्ता धारेव धात्री रिपुतिमिरभरैर्मौललोकस्तदाभूत् ।
विस्रस्ताङ्गे निहत्योद्भटरिपुतिमिरं खड्गदण्डांशुजालै--रन्यो भास्वानिवोद्यन् द्युतिमुदितजनात्मोदयादित्यदेवः ॥

(E. I. Vol. I, P. 236 ,V. 21, P. 238)

"Udayāditya is reported to have erected many other temples, caused tanks to be excavated, performed religious ceremonies, and granted lands productive of gold and corn to the Brāhmaṇas. It can hardly be doubted that some among the group of temples at Un, were his own contributions." (P. 138).

"He is described in the Udayapur Praśasti as a relation of Bhoja." (P. 133) —History of the Paramāra dynasty.

"As a true successor to the throne of Muñja and Bhoja, he (Udayâditya) paid equal attention to the healthy advancement of the literary movement. The judicious care which he took for the furtherance of education is unique in its character. In the field of architecture his achievements were marvellous. The great Nīlakaṇṭheśvara temple still stands to testify to his greatness. Thus the work set on foot by Muñja and Bhoja for erecting Mālwā into an ideal State was in full operation during the reign of Udayāditya, and did not flag for want of royal patronage.' (pp. 138-139)

this there are references to Yavanas at two places. In verse 143[1] it is said that 'in the house of a Yavana ivory pieces of horses' mouth can be placed either right or left, (which cannot be done in the house of a Hindu)'. So also in verse 280[2] it is said that the rules to be observed with regard to the house of a Hindu are not to be observed in the House of a Yavana. Here Yavana undoubtedly means Muslims. This reference suggests that Muslim houses had become so common as to make it necessary to refer to them in such discussions. Thus the work cannot be earlier than the 13th cent. A.D. From its subject-matter and the style also it does not seem to be earlier than the 13th or the 14th cent. A.D. The exact determination of the date of the work, however, will depend upon the identification of Bhānu.

Importance of the work—There are number of works on Śilpa as well as sections and chapters on the subject in the Purāṇas and the Upapurāṇas Rāma Rāz in his Essay on Architecture of Hindus refers to about 64 works on architecture. Dr. P. K. Acharya in his Encyclopaedia of Hindu Architecture gives a long list of more than 300 titles of works printed as well as in manuscript. As Rāma Rāz does not give the names of the works known to him we cannot say whether Pramāṇamañjarī was known to him. In Dr. Acharya's list, however, Pramāṇamañjarī is not mentioned. So inspite of the publication of an incomplete and corrupt version in Gujarātī, Pramāṇamañjarī has not been known as it deserves to the students of ancient architecture. Hence this attempt at the preparation of an edition of this important work.

As said before, the importance of this work lies in the fact that in contrast to other works on Śilpa which generally devote themselves to temples and palaces referring only cursorily to the houses of the common men, this work concerns itself mainly with the neglected subject of the houses of the three varṇas. Thus one may say that Pramāṇamañjarī is a work on domestic architecture as distinguished from royal or religious architecture.[3]

Contents—The work opens with a benedictory stanza. The purpose of the work is mentioned in Verse two. The author proposes to give various kinds of measurements of wooden structures of a house taking his subject-matter in an abridged form from a work called Jaya.[4]

---

[1] गजदन्ताकुै (? ती)श्चापि **यवनानां** प्रकारयेत् ।
वामे वा दक्षिणे वापि कृतास्ते न च दोषदाः ॥ १४३

[2] समशालं न कर्तव्यं विना युग्मं कथञ्चन ॥ २७९
यवनस्य च तान्येवं भवेयुः कीर्तिवृद्धये ।
सर्वेषां युग्मपर्यन्ते त्रिशालं धनवतां तथा ॥ २८०

[3] For other Sanskrit works on domestic architecture see appendix I.

[4] "The sthapathis of the Tanjore District refer also a tradition about three renowned artists named Jaya and Parajaya and Vijaya but nothing is

Doors—(Dvāra) The author starts with the proportional measurements of the doors according to the sizes of the houses (3-8). Nearly three to four verses describe the door-frames (Śākhā) with different styles (8-15). The proportions of Toḍakā and Mañcikā are stated in three verses (16-18). After the explanation of Pratimañcikā, Pīṭha, Jāḍyakumbha we find an important discussion on Udambara (threshold) (20-22). Pīṭha, Jāḍyakumbha, Kaṇī and Bhadra are given with the appropriate decoration (19-23). The proportions of Mandāraka and Rathikā are given in short (24-25). Nearly ten verses describe the measurements (length and breadth) of uttaraṅga, its decoration and also the Toḍikā with proper ornamentation (26-36). Only in one verse we find the proportions of Chādyakī (37). Again we find the descriptions of Śākhā for palaces and temples and also for the houses of the four varṇas (39-40). Thus the author ends this section naming it *Dvāravidhi*.

The *elevation* of the house (Gṛhocchrāya)—

Here we find the height of houses, with the measurements of pillars and other wooden structures. The main types of the houses are classified according to their heights. They are Kaniṣṭha, Madhyama and Jyeṣṭha. These three types are further sub-divided into three classes making nine in all as Kaniṣṭha Kaniṣṭha, Kaniṣṭhamadhyama, Kaniṣṭhajyeṣṭha ; Madhyamakaniṣṭha, madhyama-madhyama, madhymajyeṣṭha ; Jyeṣṭha Kaniṣṭha, jyeṣṭha madhyama, jyeṣṭha jyeṣṭha (41-45). The proportions of Kumbhī and Stambha are seen in three verses (46-48).

Wooden Structures (Kāṣṭharacanā)—After knowing the general measurements and proportions of the different parts of the houses, we are introduced to a new section on Kāṣṭharacanā as stated in the Śāstras (अथो वक्ष्यामि काष्ठस्य रचनां शास्त्रतो (नो) दिताम् । (49-88). In this section one finds the measurements, proportions and decorations of the Paṭṭa with reference to the three varṇas and palaces (50-56). We find the mention of Tantrika, Gagāraka, Jāḍyakumbha, and Kanda in this section (57-67), Pillars (Stambhas) (68-88)—In Stambha section it is said that if the Stambhas are without Kandas, they create worries to the owners of the houses (66).

Nirvyūhaka—Three verses (89-91) describe Nirvūhaka. Nirvyūhaka should be done with appropriate decoration of round Pallavas (leaves). Nearly twenty-four verses cover the important parts of a house like Madalā, Bharaṇī, Piccha, Tulā with their proper measurements and the ornamentation (91-114).

Roof (Chādya)—Verses 115 to 146 are mainly devoted to the description of roof with its different characteristics. This section includes the Sandhipālas,

---

known about their works" (P. 68). The Indian concept of the Beautiful by K. S. Ramaswamy Sastri. University of Travancore, 1947.

Jalapaṭṭi, Turagas (on both the sides of the houses) and Dīpālaya. In connection with Turaga we find that important reference to the Yavanas.

After this section we find discussions on Sopāna and Gavākṣa (145-184) with the descriptions of Lumbikā, Dardarikā, Gavākṣastambha and Gavākṣaśākhā and Pratiśākhā. Then comes the section on Cippikā, Madala, Rājasena and Mattavārana (184-249).

The section on Mattavārana gives important information regarding figures with ornaments engaged in dramatic gestures and dance-poses. It is enjoined that all the stambhas also should be decorated with figures in dance-poses.

The minor parts of the house are given in verses 250-273. They are kapāṭa, kīlaka, kaṭaka etc.

Stories (Bhūmikā)—The last section is devoted to the stories of houses. The number of stories should depend upon the class of owners—kings, different Varṇas as also the Yavanas (Muslims) (274-281).

In the remaining portion of the text we find a sort of summary of the miscellaneous items. (281-305).

The last three verses give the name of the author, the name of the work and the consequence of the house built in an auspicious moment.

विधिनानेन रचितं गृहं सर्वार्थसिद्धिदम् ।
मनोहरेण रचितं शाकादीष्टेन दारुणा ॥ ३०६
ज्योतिःशास्त्रोदिते लग्ने मुहूर्त्ते सद्गुणान्विते ।
शिल्पिना शास्त्रतः कार्यं गृहमैश्वर्यदं शुभम् ॥ ३०७
प्रमाणमञ्जरी मेयं नाम्ना सर्वोपकारिणी ।
यस्या विज्ञानमात्रेण बुद्धिहीनोऽपि सिध्यति ॥ ३०८

I am grateful to the Gujarat University, Ahmedabad, for helping me with a grant to do research work on some mss. in the possession of the Hemachandracharya Jnana Bhandar, Patan (N. Gujarat). I chose for the purpose, three mss. two on Mudrās (Jain) and one on domestic architecture named Pramāṇamañjarī. I am thankful to Muni Shri Punyavijayaji for getting me these mss.

I take this opportunity of expressing my sincere thanks to my painstaking teacher and great friend Prof. R. C. Parikh, Director of the B. J. Institute of learning and Research, Ahmedabad, for the valuable guidance that I have received from him in connection with my research work in general and this one in particular.

Lastly, my thanks are due to Prof. G. H. Bhatt, Director of Oriental Institute, Baroda, for accepting this work for publication in the M. S. University Oriental Series.

Panchavati,
Ahmedabad,
23-6-1956.

PRIYABALA SHAH

॥ प्रमाणमञ्जरी ॥

† [मङ्गलम्]

विरञ्चिविश्वेश्वरविष्णुमूर्तिं विनायकं विघ्नहरं गभस्तिम् ।
श्रीभारतीं श्रीत्वरितां सदैव श्रीविश्वकर्माणा(? ण)महं नमामि ॥ १

[प्रयोजन]

अथोच्यते सारतरस्य सारं काष्ठोदयालिन्दसमुद्भवं तम् ।
मानं समस्तं जयधीक्षदृष्टं सुशिल्पिकं सर्वजनोपकारम् ॥ २

[द्वार]

द्वाराण्यथ प्रवक्ष्यामि शालादैर्घ्यप्रमाणतः ।
पञ्चहस्तादितः शालामानं यावत् त्रयोदशम् ॥ ३

कनीयसा पञ्चहस्ताद् यावत् सप्तकरा भवेत् ।
द्वात्रयास्त्रिंशदारभ्य त्रिवृद् व्याकल्पयेत् क्रमात् ॥ ४

मध्याष्टहस्तादारभ्य शाला दशकरावधिः ।
चन्द्रवेदाङ्गुलमिताद् द्वारं द्वाभ्यां विवर्द्धयेत् ॥ ५

एकादशकरा शाला रविविश्वमिताथवा ।
ज्येष्ठा तु द्वारजं मानं सैकवृद्ध्या रसाब्धितः ॥ ६

द्वारं विस्तारतः कार्यं द्विगुणं ज्येष्ठमुच्चकम् ।
मध्यं व्यर्कांशतः कार्यं षष्ठांशोनं कनीयसम् ॥ ७

सप्तत्या संयुतेनापि षष्ट्या पञ्चशता क्रमात् ।
गृहव्यासजितांशेन द्वारोच्छ्रायं त्रिधा भवेत् ॥

एतज्ज्येष्ठमथ प्रोक्तं नृपांशोनं तु मध्यमम् ।
कनीयसं व्यष्टमांशं नवधा मानमुच्यते ॥ ९

गृहोत्सेधं तृ(? धस्तृ)तीयांशहीनो वा मानमुच्यते ।
त्रिधैवं पूर्ववत् कार्यं व्यासस्यापि तथा भवेत् ॥ १०

द्वारोच्छ्रयार्धतस्तुल्यो व्यासः स्यात् तत्कनीयसः ।
रुद्रांशेनाधिको मध्या(? ध्यो)ज्ज्येष्ठा(? ज्येष्ठो)भूतांशतोऽधिकः ॥ ११

† Ms. begins with ॥ ६० ॥ ॐ नमः ॥ श्रीविश्वकर्मणे नमः ॥ श्रीगुरुगणेशभारतीभ्यो नमः ॥

[शाखा]

द्वारव्यासः सप्तमांशः शाखाव्यासः प्रकीर्तितः ।
ज्येष्ठो मन्वंशसंयुक्तो हीनः स्यात् तत्कनीयसः ॥ १२
मन्वंशेन तथोच्छ्रायाद् व्यासः स्यान्मूलशाखयोः ।
मध्यस्तदंशसंवृद्धया ज्येष्ठोद्धा(? ह्रा)सात् कनीयसः ॥ १३
स्तम्भव्यासे षड्विभक्ते शाखा-पञ्चांशसंमितः(? ता) ।
सार्द्धवेदमिता मध्या वेदभागमिताधमा ॥ १४

[प्रतिशाखा]

शाखाविस्तारतो व्यंह्रिमाने(? नं)तत्पिण्डनाम(? मान)तः ।
प्रतिशाखा च तन्माना पिण्डे व्यैनिर्गमे समा ॥ १५

[पृष्ठशाखा, तोडका, मञ्चिका]

मूलशाखाप्रमाणेन पृष्ठशाखे प्रकल्पयेत् ।
ऊर्ध्वस्य तोडका तादृक् मञ्चिकापि च तादृशी ॥ १६

[उदम्बर]

द्वारमानं मया प्रोक्तं रचनालक्षणं ब्रुवे ।
शाखोच्छ्रये षड्विभक्ते भागेन स्यादुदम्बरः ॥ १७

[मञ्चिका]

त्रिधा विभक्तं तस्योच्चं मञ्चिका भागतो भवेत् ।

[प्रतिमञ्चिका]

उदम्बरादधः कार्या तदर्धा प्रतिमञ्चिका ॥ १८

[पीठ, जाड्यकुम्भ, कणी, भद्र]

तत्र पीठं प्रकर्त्तव्यं जाड्यकुम्भकणीयुतम् ।
जलान्तरं प्रकर्त्तव्यं भद्रकोणविभूषितम् ॥ १९

[उदम्बर]

उदम्बरव्यासमानं भूतांशे द्वारविस्तरात् ।
व्यासाष्टमांशेन वा तत् तु कार्या शाखा सपादतः ॥ २०
स्तम्भव्याससमं कार्यं व्यासमानमुदम्बरे ।
अष्टांशवृद्धिह्रासाद् वा त्रिधैव परिकीर्त्तितम् ॥ २१
तत्र भद्राणि कुर्वीत शाखाविस्तारतो बहिः ।
द्वित्रिकोणमितानि स्युः ड—कर्धे—नातरम् ॥ २२

[भद्रकोण]

पुष्पाद्यलंकृतं कार्यं तथा सत्पल्लवादिभिः ।
यथाशोभं प्रकर्त्तव्यं भद्रकोण उदुम्बरे ॥ २३

[मन्दारक]

द्वारव्यासतृतीयांशं तदष्टांशविवर्जितम् ।
मध्यमन्दारकं कार्यं सुवृत्तं पल्लवान्वितम् ॥ २४
प्रान्ते तस्यापि कर्त्तव्यं भद्रं मन्दारकार्धतः ।

[रथिका]

अंशेन रथिका कार्या भद्रमन्दारकान्तरे ॥ २५

[उत्तरङ्ग]

शाखाविस्तरमानं स्यादुत्तरङ्गं समोदयम् ।
भद्रं बहिर्गतं मानाद् द्वातु(? स्तु)र्यांशेन कोणयुक् ॥ २६
मुक्त्वा तुर्यांशकं मूलाद् धीत्री(? द्वित्रि)शाखासु कारयेत् ।
उत्तरङ्गे तथा वल्ली विना मध्यं हि सर्वतः ॥ २७
प्रतिशाखं तया कार्यं पल्लवैः पिण्डसंयुतैः ।
तस्यान्तरे पुष्पमालाः कोणे कोणे व्यवस्थिताः ॥ २८

[तोडिका]

उत्तरङ्गेषु संलग्नतोडिकाथार्धसंस्थिताः(? ता) ।
प्रान्ते स्वलंकृताः कार्या भित्तिविस्तारतोऽधिकाः ॥ २९
मध्ये वै चोत्तरङ्गस्य गणनाथं निधापयेत् ।
दातारं सर्वसिद्धीनां हन्तारं सकलापदाम् ॥ ३०
उत्तरङ्गोपरि न्यस्तं पट्टं सौभाग्यसञ्ज्ञकम् ।
तत्र मध्ये गतं भद्रं कर्त्तव्यं चोत्तरङ्गवत् ॥ ३१
ततः पार्श्वयुगेऽन्योन्यसंमुखौ पल्लवौ न्यसेत् ।
कर्णिकाजाड्यकुम्भेन संयुतौ रमणीयकौ ॥ ३२
तस्यान्तरे पुष्पमाला कार्या कोणाद्यलंकृता ।
भद्रमध्ये प्रकर्त्तव्या लक्ष्मीसौभाग्यदायिका ॥ ३३
सौभाग्यपट्टजं मानं प्रतिशाखासमं बुधैः ।
व्यासे पिण्डेऽपि वा कार्या स्वरूपं लक्षणान्वितम् ॥ ३४

शाखान्तरालकक्षास्तु मालाबकुलसंभवा ।
कार्या सच्चम्पका(? को)द्भूता परितो मण्डलाकृतिः ॥ ३५

मध्ये हंसयुतं रम्यं भद्रकोणे सघण्टिका ।
पार्श्वद्वये तथा कार्या सचित्रा कन्दसंयुता ॥ ३६

[छाद्यकी].

तथा द्वारोपरि न्यस्ता छाद्यकी भद्रभूषिता ।
जाड्यकुम्भाकृतिस्तूर्द्ध्वे अधो वा कर्णसंयुता ॥ ३७

तृणपर्णमये गेहे द्वारन्यासो भवेत् त्रिधा ।
स्वोच्छ्रायमानतो ऊनो तदर्कांशैस्तु वर्जिताः ॥ ३८

दशभागा यथा तास्ताः शाखाश्चैव तथा नव ।
तत्तु राजगृहे भागः (? ग) स्यांह्रिवृद्ध्या त्रिधा भवेत् ॥ ३९

इति द्वारविधिः ॥

[शाखा]

एकशाखं द्विशाखं वा गृहं वर्णचतुष्टये ।
न त्रिशाखं पञ्चशाखं कार्यं भूमिभुजां विना ॥ ४०

[गृहोच्छ्राय]

वक्ष्याम्यथ गृहोच्छ्रायं द्विसप्तत्या कनीयसम् ।
मध्ये वै वेदतोऽशि(? शी)त्या षण्णवत्या तथोत्तमम् ॥ ४१

त्रिधैवं वृद्धिस्तस्यापि वेदवेदाङ्गुलैः क्रमात् ।
गृहन्यासकलांशेन संयुतो नवधा भवेत् ॥ ४२

ज्येष्ठायां सप्तहस्तः स्याद् मध्यायां षट्करो भवेत् ।
पञ्चहस्तः कनीयस्यां शालायां परमोदयः ॥ ४३

अयं राजगृहोच्छ्रायः सभानृत्यालयादिषु ।
विचार्य शिल्पिना कार्यो भूपतेर्जयमिच्छता ॥ ४४

कनीयस्यां चतुर्हस्ता वृद्ध्या रसाङ्गुलैः क्रमात् ।
मध्यायां सप्तसंवृद्ध्या ज्येष्ठायां वसुवृद्धितः ॥ ४५

[कुम्भिका]

इदं वर्णत्रये कार्यं गृहरूपानुसारतः ।
उच्छ्रये नवधा भक्ते कुम्भिकाभागतो भवेत् ॥ ४६

[स्तम्भ]

स्तम्भः षड्भाग उच्छ्राये भागार्द्धं भरणं स्मृतम् ।
शिरो भागार्द्धतः प्रोक्तं पट्टोऽर्द्धं भागसंमितम् ॥ ४७
दशैकादशसंभक्तैः स्तम्भः सप्ताष्टभागतः ।

[काष्ठस्य रचना]

अथ वक्ष्यामि काष्ठस्य रचनां शास्त्रनोदिताम् ॥ ४८
काष्ठस्याग्रयुगांशान्तो कोणेनाग्रं तु नेक्षते ।
पूर्वसौम्यासृतं मूलं तस्य दोषकरं त्यजेत् ॥ ४९

[पट्टविस्तार]

द्वारविस्तरतुर्यांशे पट्टविस्तार उच्यते ।
तत्र पादाधिकं ज्येष्ठं पादहीनं कनीयसम् ॥ ५०
त्रिधा कनीयसं ह्रासवृद्धया रन्ध्रांशतो भवेत् ।
मध्यं त्रिधा तु रव्यंशात् ज्येष्ठं तिथ्यंशतो भवेत् ॥ ५१
ज्येष्ठमध्यकनिष्ठैस्तु भेदैस्तं नवधा भवेत् ।
तदुत्तमं हीनजातौ न कर्त्तव्यं कदाचन ॥ ५२
वैश्यादितो हीनजातौ द्रव्यहीने कनीयसम् ।
मध्यं सर्वत्र कर्त्तव्यं ज्येष्ठं राजालये स्मृतम् ॥ ५३
कनिष्ठासु च मध्यासु ज्येष्ठासु द्वारविस्तरात् ।
चतुर्थांशेन कर्त्तव्यः पट्टविस्तारशोभनः ॥ ५४
वृद्धया दिगंशतो लब्ध्वा हीनो वा स्यात् त्रिधा भवेत् ।
मध्यायां रुद्रभागेन ज्येष्ठायां रविभागतः ॥ ५५
तथा सर्वासु शालासु भवेद् द्वारोच्छ्रयादपि ।
अष्टमांशे प्रकर्त्तव्यः पट्टव्यासस्तु शोभनः ॥ ५६
वर्णत्रयेषु कर्त्तव्यं भूभुजां धनिनां गृहे ।

[पिण्ड]

पिण्डे बिस्तारतो न्यूनं न तु बिस्तारतोऽधिकम् ॥ ५७

[तम्भिरक]

इन्द्रांशैर्भाजिते पट्टे विस्तारे भागभागतः ।
तम्भिरकं निर्गतं कार्यं पार्श्वयोरुभयोरपि ॥ ५८

पट्टोच्छ्रायत्रिभागोना तन्त्रिकस्योच्छ्रिता भ(? तिर्भ)वेत् ।
उच्चैस्त्रिधा संविभक्तौ भागैकांशेन पट्टिका ॥ ५९

[गगारक]

द्वाभ्यां गगारकान् कुर्यादन्तराकलिकायुतान् ।
नो चेत् तदा सार्द्धभागे कर्णयुक्तं गगारकम् ॥ ६०
कार्यं भागैकतोऽधस्तात् पङ्क्तिरन्त्यापि तादृशी ।
तत्राधस्तादर्द्धभागं पङ्क्तौ पत्रावलिस्तथा ॥ ६१

[जाड्यकुम्भम्]

प्रान्तयोरुभयोः कार्यं कर्णिकाजाड्यकुम्भकम् ।
पल्लवेनावृतं कार्यं तन्त्रिकं लक्षणान्वितम् ॥ ६२
पट्टाधस्तान्मध्यदेशे पद्मं कार्यं सकर्णिकम् ।
पङ्क्तयायुक्तं सुशोभाढ्यं मध्ये सन्मकरैर्युतम् ॥ ६३
पल्लवेनावृतं भद्रं पार्श्वयोः कलशैर्युतम् ।
चतुरस्रो भवेत् तत्र पट्टः कार्यो मनोरमः ॥ ६४
विभज्य पदविस्तारं चतुर्धा तादृशैस्त्रिभिः ।

। वा पाठः—पञ्चधा तादृशाब्धिभिः ।

पञ्च स्तम्भाः प्रकर्त्तव्याश्चतुरस्रास्तु शोभिताः ॥ ६५

[कन्द]

कन्देन रमणीयेन संयुता मस्तके च ते ।
कन्देन रहिताः स्तम्भाः कृता उद्वेगकारकाः ॥ ६६
कलांशेनाधिका ज्येष्ठा हीनाश्चैते कनिष्ठिकाः ।
ये च कोणगताः स्तम्भास्तथा भित्त्याश्रिताश्च ये ॥ ६७

[स्तम्भ]

स्तम्भव्यासार्धतातुल्ये पादोने तस्य पिण्डतः ।
वृत्तं भद्रयुतं स्तम्भैस्त्य(? म्भं त्य)जेद् राजगृहं विना ॥ ६८
स्तम्भविस्तारतः सार्द्धमानेनानेन कुम्भिकाः ।
विस्तारे चोच्छ्रये कार्याः पदो(? ट्टो)च्छ्रायसमा बुधैः ॥ ६९
तिथ्यंशैर्भाजिते तस्मिन् खुरकं पञ्चभागिकम् ।
कुम्भाकारं तु षद् सार्धं कलशं तु त्रिभागतः ॥ ७०

[चिप्पिका, कन्द, खुर]

भागार्द्धं चिप्पिकाः कार्या उर्ध्वकन्दसमन्विताः ।
निर्गमो ह्यंह्रिभागैः स्यात् स्कन्धोऽधस्तेऽपि कुम्भतः ॥ ७१

तत्समः क्षोभ्यमानस्तु मध्यगान्धारिका स्मृता ।
प्रतिष्ठा चरिता रम्या भागपादेन विस्तृता ॥ ७२

खुरोपरि मतं कोणे दशांशेन गगारकम् ।
कुम्भाङ्गं द्वादशांशेन कार्यं व्यासस्य मूलतः ॥ ७३

कुम्भः(? म्भं)कुम्भ्या समं शिल्पी स्थिरे देशे तु कारयेत् ।
उदम्बरसमा कार्या विचित्रा लक्षणान्विता ॥ ७४

[भरण]

स्तम्भव्यासे पञ्चभक्तौ(? क्त्वे)भरणं वसुसंमितम् ।
पृथक्त्वे तत्कलांशेन वृद्धिह्रासस्त्रिधा भवेत् ॥ ७५

पादोना स्यात् ततोऽप्यर्द्धा कार्या तस्योच्छ्रितिर्भजेत् ।
भागत्रयेण तत्रापि रचना प्रोच्यतेऽधुना ॥ ७६

स्तम्भप्रमाणोपरितः स्कन्धं मुक्त्वाथ चिप्पिका ।
कर्णिकान्धारिकायुक्ता कार्या भागैकमध्यतः ॥ ७७

जाड्यकुम्भं च सत्कन्दं भागतुल्यं प्रकल्पयेत् ।
भागतुल्यां च तस्योर्ध्वे गिरिमालां प्रकल्पयेत् ॥ ७८

[शीर्षम्]

स्तम्भविस्तारतातुल्यं विस्तीर्णं शीर्षमुच्यते ।
स्तम्भस्य परितो दैर्ध्ये स्तम्भात् सार्द्धे(? र्द्धं)द्विसंगुणम् ॥ ७९

सपादद्विगुणं मध्यं ज्येष्ठं पादोनरामजम् ।
कार्यं पट्टार्द्धभागेन तत्पिण्डं सप्तधा भजेत् ॥ ८०

भागद्वयमिता चोर्ध्वे पट्टिका भागतोऽपरा ।
वेदभागमिते शीर्षपिण्डं तत्र सुचित्रकम् ॥ ८१

नवधा तत्र विस्तारं भजेद् भूतांशकात् परम् ।
पार्श्वयोरुभयोस्तत्र फालने भागसंमिते ॥ ८२

[फालना तुण्डिका]

स्तम्भाद् विनिर्गतं मानं दैर्ध्यजं सप्तधा भजेत् ।
चतुरस्रं सार्द्धभागं फालनाद्वयसंयुतम् ॥ ८३

तत्कोणे पल्लवे कार्ये ततः पादोनयुग्मकः ।
कर्णिकां जाड्यकुम्भेन सयुतां तत्र कारयेत् ॥ ८४

पादोनद्वयभागेन तुण्डिकां तत्र कारयेत् ।
तदग्रे कुमुदाकारं भागद्वयं मितान्तरम् ॥ ८५

गगारका वृत्ता चोर्ध्वे पट्टिका रमणीयका ।
कणिका जाड्यकुम्भेन पल्लवेनावृता परा ॥ ८६

पद्माधः कारयेत् पीठं जाड्यकुम्भकणीयुतम् ।
तदूर्ध्वे पल्लवाकारं भद्रैर्युक्तं सकर्णिकम् ॥ ८७

अथवेतरलोकानां फांसाकारं सुतुण्डिकम् ।
स्तम्भार्द्धनिर्गतं कार्यं द्विगुणं व्यासमानतः ॥ ८८

[निर्व्यूहक]

अथ निर्व्यूहकं वक्ष्ये यथा शीर्षं तथा भवेत् ।
कुमुदाकारसंस्थाने मदलास्थानकं भवेत् ॥ ८९

सभद्रं कोणसंयुक्तं स पीठं च यथा भवेत् ।
घटं सपल्लवं भद्रे कोणात् सत्पल्लवावृतान्(? तम्) ॥ ९०

भागत्रयाधिकं कार्यमग्रे पद्मं सपल्लवम् ।

[मदला]

पूर्ववत् कारयेद् रम्यमिति निर्व्यूहकं स्मृतम् ॥ ९१

स्तम्भोपरिष्टान्मदला या स्यात् तल्लक्षणं ब्रुवे ।
निर्गमे द्विगुणा दैर्घ्ये दैर्घ्य-अंशेन विस्तृता ॥ ९२

विस्तरार्द्धेन तत्पिण्डं चात्मतुर्यांशहीरकम् ।
एवंविधं सुफलकं साधयेत्साधुकल्पितम् ॥ ९३

चतुर्विंशतिभागो(? गेऽथ)दैर्घ्ये व्यासेष्टसंमिताः ।
कर्त्तव्यास्ते ततस्तेषु सूत्राण्येवं प्रपातयेत् ॥ ९४

[भरणी]

चतुर्भागाङ्किते कर्णे सूत्रेणांशे शिरो भवेत् ।
तत्रस्था भरणी कार्या चोच्छ्राये सापि तत्समा ॥ ९५

तत्राधस्ताद् भवेद् ग्रीवा भरण्या(ण्य)र्द्धेन विस्तृता ।
तत्रापि पल्लवाः कार्याः परितो भाग उच्छ्रिताः ॥ ९६

सप्तभागमिते चाग्रे पिच्छं कर्णं प्रपातयेत् ।
प्रान्तात् सार्द्धषष्ठे(? ष्ठ)मितं विकर्णं गणनाद् भवेत् ॥ ९७

तस्मात् तिर्यग्गतं सूत्रं भुजाख्यं तत्प्रमाणतः ।
कर्त्तव्या तत्र युग्मांशसंभवा पुष्पपट्टिका ॥ ९८

[पिच्छ]

तस्याप्यधः प्रकर्त्तव्या जाड्यकुम्भकर्णी पुनः ।
पुनः पुनः प्रकर्त्तव्यं यावत्पिच्छं तत्संभवम् ॥ ९९

पिच्छोपरि भवेद् वक्रा मूले सप्तांशविस्तृता ।
द्यंह्रिभागसमा कार्या भवेद् वक्रा ततः परा ॥ १००

वृत्तार्द्धं हृदि कर्त्तव्यं सार्द्धरामांशकेन च ।
पृष्ठे तस्यापि कर्त्तव्यं सार्द्धवेदमितेन तैः ॥ १०१

नीचाश्रितं तथा सांह्रिभागेन चमणा(? णी) भवेत् ।
कोणाद्यलंकृता कार्या फालना द्वित्रिसंयुतैः ॥ १०२

सर्वाङ्गेषु सुशोभाढ्या कर्णे बकुलभूषिता ।
सजलं पद्मसामा(? माना)लादार्शीर्षमग्रतो भवेत् ॥ १०३

तालपट्टार्द्धपट्टान्तं मानमेतन्मयोदितम् ।
इदं सर्वोदये साधुः कल्पितं शास्त्रतो भवेत् ॥ १०४

[तुला]

स्तम्भप्रपञ्चतो हीना तुर्यांशेन तुला बुधैः ।
कार्या हस्तेन ततः पिण्डे सप्त ता विषमा नव ॥ १०५

त्रिविभक्तं तुल्यराशिद्विशेषं नैव कारयेत् ।
त्रिशेषमेकशेषं चेत् तदा वृद्धिमवाप्नुयात् ॥ १०६

तुल्ययोरप्यन्तरालं तुलाविस्तारमानतः ।
कर्त्तव्यमन्तरालं तत्संयुतं सत्कपर्दकम् ॥ १०७

तस्योपरि गते तिर्यक् श्रेणीरूपेणसंयुतैः ।
यज्ञोपवीती संलग्ना तुला सोदार्या त्रिधा भृशम् ॥ १०८

भुजपट्टैस्ततश्छाद्यमन्तरा द्यङ्गुलाधिकम् ।
अर्धाङ्गुलमितैः पिण्डैस्तथा पादाधिकैः क्रमात् ॥ १०९

सर्वान्तरालमथवा छाद्यं सज्जालकेन च ।
तुलाप्रमाणदण्डेन शिल्पिना रचितेन च ॥ ११०

जालान्तरेषु कर्त्तव्यं पद्मपङ्क्तैर्विराजितम् ।
मध्ये मुकुरमालाभिः शोभितं वा यदृच्छया ॥ १११

पट्टि(? ट्ट)कैः संधिमिलितैश्छाद्यं तस्योपरि दृढैः ।
तत्रोपरि गतं रम्यं कुट्टिमं कारयेत् सुधीः ॥ ११२

दारपट्टोपरि न्यस्य तुला(? लां)प्रान्तेषु सर्वतः ।
लुम्बिका बाह्यतः कार्या[:] सुरूपा लक्षणान्विता(:) ॥ ११३

तस्योर्ध्वतः प्रकर्त्तव्यं च्छाद्यग्राहं सुनिश्चलम् ।
तुलाव्याससमोच्छ्रायं स्थाप्यं सत्कीलकैर्युतम् ॥ ११४

[छाद्य]

छाद्यस्य लक्षणं वक्ष्ये गृहेषु सकलेष्वपि ।
उच्छ्रायार्द्धेन कर्त्तव्यं च्छाद्यं पट्टसमं शुभम् ॥ ११५

शरांशेनाधिकं ज्येष्ठः हीनं वा तत्कनीयसम् ।
सपट्टमङ्गुलं पिण्डं पादवृद्ध्या त्रिधा भवेत् ॥ ११६

पट्टोदरसमं निम्नं गृहेषु परिकल्पयेत् ।
तथा वातायने कार्यं समद्वारोत्तरं गतः ॥ ११७

[संधिपाल]

संधिपाला(:) प्रकर्त्तव्या(:) त्रिप्रासे(? न्ते) पादवृद्धितः ।
त्रिधा पिण्डेऽपि तद्वृद्ध्या सांह्रितोऽप्यङ्गुलैर्भवेत् ॥ ११८

[छाद्यलक्षणम्]

पूर्वार्द्धेषु च तुर्यांशं(? चतुर्थास्रं) कार्यं शेषं सुचित्रितम् ।
पल्लवाढ्यं प्रकर्त्तव्यं अश्वो(? श्वं)सत्कण्ठकादिकम् ॥ ११९

छाद्यग्राहेण तस्योर्ध्वं मध्यमान्तर्गतेन च ।
पट्टेन संयुताः कार्यास्तत्प्रान्ते जलपट्टिकाः ॥ १२०

अन्तरालं प्रकर्त्तव्यो निर्व्यूहोपरि संस्थितः ।
शरेणान्तरितः कार्यो मानप्राप्तेन तन्त्रिणा ॥ १२१

निर्व्यूहव्याससमानेन पिण्डः स्यादन्तरालजः ।
निर्व्यूहः पिण्डसमतान्तः व्यासः स्यात् तत्र शोभनाः ॥ १२२

फांसाकारं तु तस्योर्ध्वे छाद्य(? द्यं) निम्नानुसारतः ।
पिण्डेऽपि ऊनितान् कोणान् कोणस्था रचयेत् तथा ॥ १२३

पद्मान्यधः स्थितानि स्युः पार्श्वे वेणाद्यलंकृतम् ।
बाह्यवल्लीवृत्तं कार्यमन्तराले च कोणयोः ॥ १२४

कोणोपरि गतो मध्ये प्रान्ते समकरैर्युतम् ।
दण्डप्रान्तेषु सर्वेषु हंसानपि तु कारयेत् ॥ १२५

[जलपट्टी]

जलपट्टी प्रकर्त्तव्या दण्डविस्तारमानतः ।
सपादा विस्तरे रम्या पिण्डे तस्यार्द्धतः समाः(मा) । १२६

अन्तरालं छाद्यमध्ये स्थापितव्यं सुनिश्चलम् ।
कोणानपि च संयुक्तांस्तत्रस्थान् परिकल्पयेत् ॥ १२७

अङ्गुलाष्टमितं त्यक्त्वा छाद्यप्रान्तं ततः परम् ।
जलपट्टी दण्डलग्ना कोणयोरुभयोः समाः(मा) ॥ १२८

पट्टिकान्यपि विस्तार्य तदूर्ध्वं समभागतः ।
दण्डमध्यगताः संधिर्यथा तद्वत् प्रकल्पयेत् ॥ १२९

सर्वेषु संधिभागेषु ऊर्ध्वाधोभागयोरपि ।
संधिपालाः संनिविष्टाः कार्याः सूत्रेण सूत्रिणा ॥ १३०

पट्टिकेष्वपि सर्वेषु खल्वं पादाङ्गुलप्रमम् ।
कार्यं जलप्रवाहार्थमूर्द्ध्वभागेषु धीमता ॥ १३१

कीलकैः सुदृढं कार्यं छाद्यं मध्ये तथार्द्धतः ।
तथा कोणेषु सर्वेषु दण्डा वा(? ण्डे वै) पट्टिकादिषु ॥ १३२

जलपट्टया अधोभागे पद्मकं(? क) पङ्क्तिरुत्तमाः(? मा) ।
तदन्तस्था लम्बमानाः(ना) कर्त्तव्या दाडिमैर्युताः(ता) ॥ १३३

छाद्यलम्बप्रमाकोटिं कृत्वा द्वादशधा ततः ।
भुजेन विश्वतुल्येन छाद्यकर्णं प्रसाधयेत् ॥ १३४

प्रलम्बनमिदं कार्यं कार्ये भूमिभुजां गृहे ।
हर्म्येषु धनवतां चापि तत्र सर्वार्थसिद्धये ॥ १३५

प्रणालानि विधेयानि स्तम्भविस्तारमानतः ।
दैर्घ्ये तानि च सर्वाणि भित्तितोऽब्धिगुणानि च ॥ १३६

रसनाष्टांशतो मध्ये बाह्याष्टास्रं प्रकल्पयेत् ।

[उदक्प्लवम्]

मुखेषु मकराकारं सखल्वं प्रागुदक्प्लवम् ॥ १३७

स्तम्भगर्भोपरि न्यस्तं प्रणालं सौख्यकारकम् ।
अग्रतः पृष्ठतः श्रेष्ठो न वामे न च दक्षिणे ॥ १३८

[तुरगः]

तुरगानपि च(? व्य) कुर्वीत गृहेषु सकलेष्वपि ।
द्वारभित्तौ पृष्ठभित्तौ कर्त्तव्या वामदक्षिणे ॥ १३९

जिनांशैर्भाजिता शाला त्याज्या मध्ये चतुर्दश ।
संधौ हयानथ त्र्यंशैर्द्वौ द्वौ कोणौ तथांशकौ ॥ १४०

द्वारव्यासस्य सप्तांशे निर्गतान्यपि भित्तितः ।
कारयेत् तेषु कर्णास्तु चोत्तरङ्गसमांस्तथा ॥ १४१

गृहे प्रविशतां शस्ता सन्मुखा न पराङ्मुखा[:] ।
शान्ताः सौम्यस्या(? स्थ) वदना ते(? स्ते) वक्राश्चरणैर्युता[:] ॥ १४२

गजदन्ताकृतै(? तीं)श्चापि **यवनानां** प्रकारयेत् ।
वामे वा दक्षिणे वापि कृतास्ते न च दोषदाः ॥ १४३

[दीपालयः]

दीपालयः प्रकर्त्तव्यो द्वारभित्तेरवाङ्खः ।
(मु)

सार्द्धं रामांशकं कोणात् संस्थितिर्या जिनांशतः ॥ १४४

[सोपानं]

द्वारोच्छ्रयार्द्धतस्तूर्ध्वमासनं तेषु कल्पयेत् ।
व्यासे स्याद् द्वारतुल्यांशो जिनाङ्के(? नांशे) गृहदैर्घ्यतः ॥ १४५

उच्छ्रायस्तादृशः कार्यस्तद्बहिः कल्पयेच्छिखाः ।
सोपानसदृशीं तां तु कुर्याच्चातिमनोहराम् ॥ १४६

[गवाक्षलक्षणम्]

अथ वक्ष्ये गवाक्षस्य लक्षणं शास्त्रनिर्मितम् ।
स्तम्भपट्टोच्छ्रयादीनां सर्वं वै मानतो भवेत् ॥ १४७

द्वारोच्छ्रये(? य) चतुर्थांशे गवाक्षं स्थापयेद् बुधः ।
तस्यावधिः प्रकर्त्तव्यो गवाक्षो मानकल्पितः ॥ १४८

गवाक्षविस्तरः कार्यः सार्द्धो वै द्वारविस्तरात् ।
निर्गमे व्यासतो हीनः स च रूपानुसारत(ः) ॥ १४९

षण(? खण्ड)मध्येषु सर्वेषु गवाक्षोऽलिन्दसंयुत(ः) ।
द्वारं द्वारेण कर्त्तव्यं समं गेहानुसारतः ॥ १५०

वलीकमुत्तरङ्गाभ्यां(? त्मां) समं स्यात् तद् यथा चरेत् ।
गवाक्षस्था(? स्या)सने कार्या रम्या चासनपट्टिका ॥ १५१

[गवाक्षद्वार]

द्वारं तस्योपरि गतं व्यासे विस्तरमानतः ।
अवशिष्टं त्रयेणोर्ध्वं गृहवातायने समम् ॥ १५२

वस्वङ्कदशमांशैर्वा विस्तारमानसंमितैः ।

[गवाक्षद्वारशाखा]

गवाक्षद्वारशाखायाः प्रमाणं विस्तरे भवेत् ॥ १५३

मूलशाखोत्तरङ्गाभ्यां परितः पत्रवल्लिका ।
गणेशश्चोत्तरङ्गःस्यान्(? ङ्गस्य) मध्ये सर्वगुणान्वितः ॥ १५४

मूलशाखाप्रमाणेन पृष्ठशाखे प्रकल्पयेत् ।
प्रतिशाखे पादहीने शेषं पूर्ववदाचरेत् ॥ १५५

प्रतिशाखा तयोः कार्या सुरम्या पल्लवस्ततः ।
तदन्तराले विषमां मालाकोणेषु सर्वतः ॥ १५६

शाखयोरप्यन्तराले उर्ध्वा च कुलसंभवा ।
माला कार्या यथाशोभं शेषं पूर्वोक्तवद् भवेत् ॥ १५७

सुरम्ये तोडके कार्ये मुखे सन्मकरैर्युते ।
सौभाग्यपट्टशोभाढ्या छाद्यकी रुचिरा न्यसेत् ॥ १५८

[गवाक्षस्तम्भ]

द्वारव्यासस्तम्भमानं त्रिधा वातायने भवेत् ।
सप्ताष्टनवभिर्भागैः कार्योऽयं लक्षणान्वितः ॥ १५९

स्तम्भोऽपि चतुरस्रः स्याद् गृहेषु सकलेष्वपि ।
नृपालये भद्रयुतो वल्लीमालाङ्कितः शुभः ॥ १६०

द्वारशाखा गवाक्षस्य त्रिधा रन्ध्रांशसंयुताः ।
सदशांशा(ः) सरुद्रांशा(ः) स्तम्भोच्छ्रायस्त्रिधा भवेत् ॥ १६१

गृहस्तम्भोच्छ्रितस्तुल्यः स्तम्भं वासनपट्टतः ।
वातायनासनापट्टः पट्टैकेतेन कल्पयेत् ॥ १६२

स्तम्भोच्छ्रायः षड्विभक्तस्त्वेकेन भरणं शिरः ।
पट्टं भागैकतः कार्यं सर्वैक्ये चाष्टके(? को) भवेत् ॥ १६३

स्तम्भो(? म्भा)स्ते यादृशाः पञ्च व्यासे तादृग्विधाष्टभिः ।
कर्त्तव्यं भरणं यस्य जाड्यकुम्भकर्णीयुतम् ॥ १६४

सभद्रकोणसंयुक्तं न कार्यं भूपतेर्विना ।
शीर्षं निर्व्यूहकं रम्यं पूर्ववत् परिकल्पयेत् ॥ १६५

पट्टं सतन्त्रिकं कार्यं सपद्मं भद्रगर्भितम् ।
चतुरस्रं सुशोभाढ्यं कारयेद् विधिपूर्वकम् ॥ १६६

तदूर्ध्वे छादनं कार्यं शातु(? त)कैः पालुकान्तरे ।
अथवा समसूत्रेण कोणैर्वा पद्मगर्भितैः ॥ १६७

सुरम्या दर्दरीभिर्वा यथा छाद्यं ततो न्यसेत् ।
अष्टास्रकद्विरष्टास्रं वृत्तमेकैकतोपरि ॥ १६८

[दर्दरिका]

सर्वोदये दर्दरिका [ह्य]र्षम[? वि]स्तरसंयुता ।
स्तरार्द्धे कर्णसंयुक्ता सुवृत्ता पालुकै(? पल्लवै)र्युता ॥ १६९

स्तोर्ह(? स्त्रोर्ध्व)प्रमाणेन मिता कार्या[सा]कीलकैर्दृढा ।
स्तराः स्युर्द्वादशांशेन हीनाः प्राग्मानतोपरि ॥ १७०

सर्वैक्येन दर्दरिका तलव्यासार्द्धमुच्छ्रिता ।
तदूर्ध्वे पद्मशिलया छाद्यं शीर्षं सुशोभनम् ॥ १७१

तस्यां सत्पालकैर्युक्तं मुकुलं परिकल्पयेत् ।
प्रान्ते सत्पत्रिकाचितं पङ्क्त्या सर्वाङ्गसुन्दरम् ॥ १७२

यदायतं भवेत् क्षेत्रं दर्दरीच्छादनं कथम् ।
विना मध्यं तु तच्छाद्यं पर्पटैः पार्श्वयोरपि ॥ १७३

स्तरेण तेन वेदास्रं भवेन्मध्यं तथोपरि ।
अष्टास्रा कारिता येन पूर्ववत् परिकल्पयेत् ॥ १७४

[लुम्बिका]

गवाक्षस्थाने रम्या लुम्बिका(:) चतुरस्रकाः ।
इन्द्रांशैर्भाजिता यास्तु भद्रं षड्भागविस्तरम् ॥ १७५

एकैकानिर्गतं भद्रं कोणभद्रार्द्धतः समम् ।
द्वि(? दि)क्त्रये परितः कार्यं पृष्ठे तुर्यास्रकं विदुः ॥ १७६

पिण्डे तथैव मन्वंशा कार्या तस्योर्द्धतः क्रमात् ।
भागद्वयमिता रम्या प्रकर्त्तव्या कपोतिकाः(? का) ॥ १७७

कोणेषु पल्लवाः कार्यास्तदुच्छ्राये षडंशकाः ।
युग्मं भद्रेषु कर्त्तव्या कोणेष्वेकं हि सर्वतः ॥ १७८

पल्लवान्तर्गतं कार्यं वलयं नेत्रसंमितम् ।
पल्लवाग्रसमं वृत्तं सकन्दघसिकायुतं ॥ १७९

पल्लवोच्छ्रायतः शेषं वेदभागे घटोद्भवः
कर्तव्यं पल्लवान्तस्थो मध्ये बन्धनसंयुतः ॥ १८०

निर्गमाश्चैव मध्यस्थाः पल्लवाः परितः स्थिताः ।
दिश्यन्तेऽपि तथा कार्यो घटः सर्वाङ्गसंयुतः ॥ १८१

चिप्पिका चार्द्धकन्देन संयुता ब्र्यंह्रितो भवेत् ।
तदधः कलशः कार्यः सांह्रिमित्या सुवृत्तकः ॥ १८२
अधोभागार्द्धतः कार्या घसीकन्देन संयुताः ।
ततो भागत्रयमितं जाड्यकुम्भं प्रकारयेत् ॥ १८३

तत्राधस्तादर्धभागे स्कन्धमन्धारिका मता ।
घण्टेयं कथिता रम्या संयुता लुम्बिका भवेत् ॥ १८४

पुनरन्यप्रकारेण नवधा स्यात्तदुच्छ्रितिः ।
ऊर्ध्वकन्दं सचिप्पिकं भागार्द्धेन तु कारयेत् ॥ १८५

गिरिवर्गं चैकभागं पीठं तस्याप्यधः स्थितम् ।
जाड्यकुम्भं सकर्णिकं सार्द्धभागसमुच्छ्रिताः ॥ १८६

ततो भागद्वयमिता पल्लवा विकचाननाः ।
तदन्तसंस्थिता घण्टा वेदोच्छ्राया कर्णीयुताः(? ता) ॥ १८७

कर्त्तव्याधोमुखी रम्या मुखे सन्मुकुलैर्युताः (? ता) ।
लुम्बिकेयं पुनश्चान्यपीठस्थः कर्णिकावृतम् ॥ १८८

मूलशाखा समारोप्य दैर्घ्यभित्त्यन्तकावधिः ।
पिण्डे तथैव कर्त्तव्या घण्टिकामानबाह्यतः ॥ १८९

तत्रोपरि गता रम्या मयली शोभते यतः ।
ह्रस्वेति कथिता वक्रा लक्षणं प्रोच्यतेऽधुना ॥ १९०

तत्र निर्गमजं मानं भागैर्द्वादशाभिर्भजेत् ।
विस्तरैर्यादशाश्चाष्टौ दैर्घ्ये त्वेकोनविंशतिः ॥ १९१

फलके सूत्रसंपातात् मदली जायते ध्रुवम् ।
वेदभागमितं शीर्षे वेदास्रं कर्णसूत्रतः ॥ १९२

छित्त्वा संजायते शीर्षमूर्ध्वे शल्येन संयुतम् ।
तत्रस्था भरणी रम्या दैर्घ्ये तावन्मिता भवेत् ॥ १९३

[चिप्पिकम्]

संविभक्ताष्टभिर्भागैः स्तराँस्तत्र स्थितान् ब्रुवे ।
ऊर्ध्वे कन्दं सचिप्पिकं भागोर्ध्वेन तु कारयेत् ॥ १९४

पादोना कर्णिका कार्या कन्दमर्द्धेन कारयेत् ।
सुवृत्तः कलशः कार्यो भागैके चान्तरैर्युतम् (? तः) ॥ १९५

कोणस्थपल्लवैर्युक्तः कुम्भः सांह्रिमितं(? तो)भवेत् ।
खुरकं चार्द्धभागेन पादोनाः पत्रपङ्क्तयः ॥ १९६

इतीरितानुभरणी भरणीभिः प्रपूरिताः (? ता) ।
भरण्यर्द्धेन कर्त्तव्या ग्रीवा सत्पल्लवैर्युता ॥ १९७

नैर्ऋतीं दिशमाश्रित्य कृत्वा षड्भागसंमितम् ।
वेदास्रं कर्णतस्तस्य भवेदासनपट्टिका ॥ १९८

[मदल]

सार्द्धाष्टसम्मिता तत्र दैर्घ्ये भागद्वयोच्छ्रिताः(? ता) ।
कार्यास्त(र्या त)त्प्रान्तयोस्तस्याः फालना कोणसम्मिताः (ता)॥ १९९

मध्ये समन्ततस्तस्या वल्लीपुष्पाद्यलंकृतम् ।
कार्यं चैकेन तस्योर्ध्वे पट्टिकाकन्दसंयुतम् ॥ २००

तदूर्ध्वस्थं द्व्यंह्रिभागं समं मुक्त्वात्र पल्लवम् ।
कार्या ततः परं पार्श्वे युगे वृत्तं प्रसाधयेत् ॥ २०१

पादोनं पृष्ठतस्त्यक्त्वा पादं त्यक्त्वा तथाग्रतः ।
सार्द्धसप्तमितेः शेषो मूलः स्यान्मदलीसमा ॥ २०२

वृत्तार्द्धपृष्ठतः कार्या सांह्रिवेदमितेन च ।
कर्कटेन तथा ग्रस्तं वृत्तं सार्द्धत्रयेण च ॥ २०३
सांह्रिभागमितेनाथ ग्रीवावृत्तं प्रसाधयेत् ।
फालनात्रितयं कार्यं पार्श्वयोः कर्णमध्यगम् ॥ २०४
कर्णे बकुलिकापार्श्वे चिप्पिकापत्रपङ्क्तयः ।
पद्मग्रीवाश्रितं कार्यं पल्लवाभ्यां विभूषितम् ॥ २०५
मूलदाशीर्षपर्यन्तं सनालं पद्ममग्रतः ।
ईदृशी मदली रम्या स्थापिका लुम्बिकोपरि ॥ २०६
तदूर्ध्वे लुम्बिका कार्या चान्या मदली स्यात् पुनः ।
पार्श्वस्था मदली स्थाप्या मदलीमानमन्तरा ॥ २०७
तत्रोपरि गतं तिर्यक् फलकं सजलान्तरम् ।
वातायनं व्याससमं दैर्ध्ये कार्यं सुसूरिणा ॥ २०८
मूलशाखासमं व्यासे पिण्डे वै लुम्बिकायुतम् ।
सर्वेषु मदलीगर्भेष्वेवं भद्रं प्रकल्पयेत् ॥ २०९
वक्रिकाद्वयमध्यस्थं फालनाद्वित्रिसंयुतम् ।
जलान्तरं प्रकर्त्तव्यं समं भद्रेण सर्वतः ॥ २१०
तुर्यांशे भाजिते पिण्डे पत्रावल्यर्द्धभागतः ।
तत्समा पट्टिकाधस्ताद् व्यं(? द्वयं)शे सत्पुष्पजातयः ॥ २११
पट्टिका चोर्द्धकन्देन संयुता भागतो भवेत् ।
सर्वाण्यनेन विधिना कुर्यात् तिर्यक्फलान्वितः ॥ २१२

[राजसेन]

तदूर्ध्वं संस्थितं तिर्यग् राजसेनं प्रकारयेत् ।
वातायनसमं दैर्ध्ये व्यासे शाखाप्रमाणतः ॥ २१३
व्याससार्द्धं तदुच्छ्राये तत्र कार्यं सुचित्रितम् ।
सर्वत्र मदलीगर्भे भद्रं स्याद् वेदभागजम् ॥ २१४
जलान्तरं तथैव स्यात् कोणैर्युक्तं समांशकम् ।
भागार्द्धे निर्गतानि स्युर्दलानि सकलान्यपि ॥ २१५
तस्य पिण्डे षड्विभक्ते पादेनोर्ध्वे(? र्द्ध) स्थकन्दकः ।
पादोना चिप्पिका कार्या अर्द्धेन समपट्टिकाः ॥ २१६

सार्द्धद्वयोच्छ्रितं मध्यं तिलकान्यत्र योजयेत् ।
सममूर्द्धमितं कर्णे पादेन मुखपट्टिका ॥ २१७

भागेन चिप्पिकाधःस्था मुखे पत्रावलीयुता ।
कन्दपादमितं कार्यमेवं राजासनं भवेत् ॥ २१८

दलानि संप्रतिष्ठानि निर्गतान्यपि कानिचित् ।
कर्त्तव्यानि स्वमानार्द्धं स्थानेषूक्तेषु सर्वतः ॥ २१९

भ्रमोत्तरिताः कोशास्तु परितस्तत्र माण्डिताः ।
अधस्तात् सर्वदेशेषु कार्यं चान्यप्रकारतः ॥ २२०

दैर्घ्यं द्वादशधा कृत्वा तत्र सूत्राणि पातयेत् ।
कोणार्द्धं कोणयुगते द्विद्विभागमितं भवेत् ॥ २२१

अङ्गुलस्य चतुर्थांशे प्रतिहस्तं विनिर्गतम् ।
कार्यं तत्रोच्छ्रयं चापि भागैः षड्भिर्विभाजयेत् ॥ २२२

चिप्पिका चोर्द्धकन्देन संयुतार्द्धमिता भवेत् ।
कर्णिकाभागतः कार्या पादेनान्तरपत्रिका ॥ २२३

पद्मार्द्धकं सांह्रिभागं कर्णे तत्समतां भवेत् ।
अधो पद्मार्द्धकं सांह्रि तुल्यं पत्रावलीमुखे ॥ २२४

मुखपट्टी (:) तथाधस्तात् पादेन रचिता मताः ।
इतीरितं राजसेनं मत्तवारणकं शृणु ॥ २२५

[मत्तवारणम्]

वातायनसमं दैर्घ्यं कार्यं सन्मत्तवारणम् ।
उच्छ्रयं द्वास्तृतीयांशे त्रिधा च स्वांशवृद्धितः ॥ २२६

अंशेनोच्छ्रायतः कार्यं विनम्रं बाह्यसंस्थितम् ।
रन्ध्रांशेन तदुच्छ्रायात् पिण्डस्तस्याः प्रकीर्त्तितः ॥ २२७

रसेषु मुनिभिर्भागैर्भाजितेऽपि तदुच्छ्रये ।
एकेनाधस्तात्फलकमूर्ध्वे सांह्रिमितं भवेत् ॥ २२८

तदन्तरालसंस्थानि यान्यूर्द्धफलकानि च ।
उच्छ्रये तानि सर्वाणि कर्त्तव्यान्यवशेषतः ॥ २२९

तिर्यक् फलकतो व्यासे द्विगुणानि च सर्वशः ।
समसंख्यानि तानि स्युर्द्वारगर्भेन कारयेत् ॥ २३०

अधस्तादूर्ध्वतः कार्यौ पल्लवैः फलकैः शुभौ ।
मध्ये पङ्क्त्यावृतं पद्मं फलकव्याससंमितम् ॥ २३१
कार्यं सद्बन्धनैर्युक्तं परितः पल्लवावधि ।
अधस्तात्फलकैकासं (? कांशं) कृत्वा त्र्यंशेन पिण्डितः ॥ २३२
ऊर्ध्वाधः पट्टिकां मुक्त्वा मध्ये पुष्पावली स्मृता ।
ऊर्ध्वस्थफलकेऽधस्तात् संबन्धापत्रपङ्क्तयः ॥ २३३
कार्या वल्ली तथा बन्धमेकव्यर्धमितः क्रमात् ।
पुनरेवोर्ध्वफलकैस्त्रिधा व्याससमुच्छ्रयात् ॥ २३४
तृतीयांशेन चार्द्धेन द्वयोरर्द्धेन वा भवेत् ।
तिर्यक् फलकापिण्डाद् वा समं पादोनसंमितम् ॥ २३५
हृतमानांशतो वापि पिण्डस्तस्य त्रिधा भवेत् ।
मानेषु सकलेष्वेव यथायोग्यं प्रकारयेत् ॥ २३६
सर्वेषु तेषु कर्त्तव्या नर्त्तक्यो नृत्यसंयुताः ।
काचि(? श्चि)द्वादित्रसंयुक्ताः स्तम्भिकामुकुटैर्युताः ॥ २३७
अथ चेन्मध्यभागस्थात् कम्बी तिर्यग्गता भवेत् ।
तिर्यक् फलकमानार्द्धे पिण्डस्त्र्यंशेन वामतः ॥ २३८
ऊर्ध्वाधः पत्रिका कार्या मध्ये पुष्पाणि कारयेत् ।
न चेदेवं तदा तस्य कपोताली प्रकल्पयेत् ॥ २३९
ऊर्ध्वस्थफलकस्यार्धे कुम्भः सत्फलकैर्युतः ।
तदर्द्धभरणी दिव्या शीर्षे सत्पल्लवैर्युता ॥ २४०
पश्चादधो तथाप्येवं कार्यं सर्वेषु यत्नतः ।
तेषु भद्रं त्रिभागोक्तं कर्णस्तस्यार्द्धतो भवेत् ॥ २४१
अन्योन्यं सन्मुखा कार्या भरणी पल्लवैर्युता ।
पूर्वापरविभागेषु प्रकारोऽन्यः प्रकीर्त्तितः ॥ २४२
ऊर्द्ध्वे त्रिधा पुनः कार्यं मध्ये वै कम्बिकायुतम् ।
न्यस्ते तत्रान्तरा कार्यं भद्रकोणं विभागतः ॥ २४३
मध्यभागे प्रकर्त्तव्या नर्त्तक्यो नाट्यसंयुताः ।
सनृत्यसंयुता काचित् कचिद् भूषणधारिणी ॥ २४४
पूर्वापरविभागेषु पूर्ववत्परिकल्पयेत् ।
पार्श्वद्वये तथाप्येवं फलकानि च सर्वशः ॥ २४५

ऊर्ध्वस्थफलकान्तरं सार्द्धद्व्यङ्गुलसंमितम् ।
हीनाधिकं तथा काय(? र्ये)मङ्गुलार्द्धं तथा भवेत् ॥ २४६
स्तम्भीयुगं सनाराचं सुवृतं रङ्गराञ्जितम् ।
न्यसेन्मध्यगतं रम्यमन्तरेषु च सर्वतः ॥ २४७
कोणानपि तथा सर्वान् लोहबन्धेन कारयेत् ।
स्तम्भेषु सविलग्नं तत् संयुतं नालिकान्तरा ॥ २४८
सुवृत्तः सकलेनोर्द्ध्वं संयुतं सुखहेतवे ।
इतीरितं महादिव्यं मत्तवारणकं मया ॥ २४९

*[कपाटम्]

कपाटं सुदृढं कार्यं गृहनिर्गमदक्षिणे ।
यदि युग्मं तथा वामे भवेत् तत्र कनीयसम् ॥ २५०
शाखाविस्तारमानेन पिण्डः स्यात् पट्टिकेष्विह ।
तत्सपादं च पादोनं कार्यमेव त्रिधा भवेत् ॥ २५१

[संधिपालः]

संधिपालाः प्रकर्त्तव्या व्यासे शाखाप्रमाणतः ।
अब्धि-भूत-षडंशेन हीनास्ते त्रिविधा मताः ॥ २५२
व्यासार्द्धमानतः पिण्डे कर्त्तव्यास्ते मनोरमाः ।
कार्याः शाखाश्रिता व्यासे ऊना विस्तारमानतः ॥२५३
आदितो विषमाश्चोर्ध्वाः कार्यास्तिर्यग्गताश्च ये ।
चतुष्कसमताभावो समास्तिर्यग्गताः क्वचित् ॥ २५४
चतुष्काः सर्वयोगेषु भद्रकर्णं विभाजयेत् ।
पद्मं तन्मध्यगं कार्यं कोणाः सत्कण्टकावृताः ॥ २५५
चतुष्कयोरन्तराले तिलकान् पुष्पसंयुतान् ।
कारयेद् वेदपत्रेण संयुतान् कालिकान्तरान् ॥ २५६
भद्रकोणावधिस्तत्र पार्श्वयोः फालने न्यसेत् ।
तत्र सत्पल्लवेऽन्योन्यः सन्मुखो मालिकान्तरे ॥ २५७

[कीलकम्]

लोहजेन तु बन्धेन बन्धितं सुदृढं तथा ।
तथा कार्यं मध्यभागे चतुष्केषु च कीलकम् ॥ २५८

लोहमस्तं (? यं) भद्रयुतं तेन प्रोतं(? क्तं) सुशीर्षकम् ।
कीलकं स्थापयेद् धीमान् स्थिरीभूतं यथा भवेत् ॥ २५९
अल्पं लोहमयं चाधः प्रान्तेषु सुदृढं स्मृतम् ।
पक्षिणीप्रान्ततस्तस्य कार्यं तेन दृढं भवेत् ॥ २६०
ऊर्ध्वशल्यं तथा लोहबन्धने परिवेष्टयेत् ।
धातुना रमितं लोहं कार्यं धनवतां गृहे ॥ २६१

[कटकौ]

पिधानार्थाय तन्मध्ये सुरम्यौ कटकौ न्यसेत् ।
सुवृत्तौ सुदृढौ चापि सुस्थितौ पुष्पसंयुतम् (? तौ) ॥ २६२
लोहजोदू(लू)खलोधःस्थः स्थिरस्तत्रोपरि न्यसेत् ।
कपाटभ्रमणात् तेन वायुवेगतरं भवेत् ॥ २६३
स्थिरं तत्रैव कर्त्तव्यं यथा स्वं न पिधीयते ।
स्वयमुद्घाटितं नापि स्वात्मनः श्रियमिच्छता ॥ २६४
शाला दैर्घ्यं पञ्चहस्ता द्विश्चान्तं नवधा मतम् ।
मन्वङ्गुलोदिता भित्तिर्मानं द्व्यङ्गुलवृद्धितः ॥ २६५
व्यासस्य षोडशांशेन संयुतं ज्येष्ठमुच्यते ।
द्वात्रिंशेन संयुतं तन्मध्यमेवं त्रिधा भवेत् ॥ २६६
द्वित्रिशालादिके गेहे कार्यं द्वित्र्यादिभूमिके ।
शालाव्यासश्चतुर्थांशे भित्तेर्मानं प्रकल्पयेत् ॥ २६७
आदिभूम्युच्छ्रयार्द्धेन पीठबन्धं प्रकारयेत् ।
राजालये कुम्भपीठमथ पञ्चादिमेखलम् ॥ २६८
हस्तादितस्त्रिपर्यन्तं पीठं षट्पर्ववृद्धितः ।
गृहेषु नवधा कार्यं शूद्रादेस्त्र्यादिमेखलम् ॥ २६९
मेखलास्ताः प्रकर्त्तव्याः [:] क्रमादेकांशवर्जिताः [:] ।
उच्छ्रयेऽपि तथा कार्या निर्गमे त्र्यङ्गुलादितः ॥ २७०
अथ राजालये योग्यं महाधनवतां तथा ।
विप्राग(? प्र)णीषु तत्कार्यं सर्वराज्ञामु(? म)पेक्षया ॥ २७१
चतुर्हस्तात् समारभ्य गृहं द्वात्रिंशहस्तकम् ।
विप्रादीनां प्रकर्त्तव्यं व्यासे जलधिहानितः ॥ २७२

ऊर्ध्वं द्वात्रिंशतः कार्यं यावदष्टोत्तरं शतम् ।
राजालयं भूमिभागवशेन परिकल्पयेत् ॥ २७३

[भूमिका]

वसुव्यासमिते गेहे भूमिरेका प्रशस्यते ।
ततो दिग्वर्धिते व्यासे भूमिवृद्धिः प्रकीर्तिता ॥ २७४
एकाद्येकादशमिता भूमयः स्युर्नवा(? चा)धिकाः ।
आदिभूम्युच्छ्रयाः सर्वाः(? र्वे)क्रमादर्कांशवर्जिताः ॥ २७५
षण्णवत्यङ्गुलैर्युक्ता गृहव्यासकलांशकाः ।
आदिभूम्युच्छ्रये मानं नातो दीर्घं प्रशस्यते ॥ २७६
स उच्छ्रायः प्रकर्त्तव्यो येनोर्ध्वा भूमिका भवेत् ।
चतुर्हस्तमिताधस्तात् सर्वा रुद्रांशतोऽधिकाः ॥ २७७
विप्रादीनां च वर्णानां भूमिरेकैकवर्जिता ।
क्रमाद् राजालयात् कार्यं भूपतेर्जयमिच्छता ॥ २७८
आदितो नवशालानां कार्यं राजानुसारतः ।
समशालं न कर्त्तव्यं विना युग्मं कथञ्चन ॥ २७९
यवनस्य च तान्येव भवेयुः कीर्त्तिवृद्धये ।
सर्वेषां युग्मपर्यन्ते त्रिशालं धनवतां तथा ॥ २८०
ज्येष्ठा मध्यगता कार्या मध्या तत्पार्श्वयोः स्थिताः ।
कनीयसी तदन्तस्था हीना वस्वङ्गुलैः क्रमात् ॥ २८१

[अलिन्दाः]

तत्त्वांशसंमिता शाला ह्यन्तर्भित्तिद्विभागतः ।
अलिन्दाः स्युर्दशांशोत्था एवं सर्वैक्यतो भवेत् ॥ २८२
शाला रसहता भक्ता बाणचन्द्रैरलिन्दकः ।
नवैकविंशता वापि कलां षट्त्रिंशताथवा ॥ २८३
सभ्रमेषु च सर्वेषु भ्रमोऽलिन्देन संयुतः ।
वेदिवृद्ध्यायते वेदी मानं कनीयसात्षणा(? त्खण्डा)त् ॥ २८४
सर्वेषु मण्डपेष्वेवं कार्यं रूपानुसारतः ।
गृहायजात्रयोऽलिन्दाः क्रमाद् द्वात्रिंशताधिकाः ॥ २८५
स्तम्भश्रेणिषु सर्वासु दृढं पादप्रपूरणम् ।
कार्यं पक्वेष्टकाभिर्वा पाषाणैर्वा यथेच्छया ॥ २८६

स्तम्भानामत्र संस्थानं विशेषेण प्रपूरयेत् ।
बद्धभूमिसमा रम्या कर्त्तव्याधः स्थिताः शिलाः ॥ २८७
तलपट्टानि तस्योर्ध्वे उनान्येकैतो न्यसेत् ।
कुम्भीप्रमाणतस्तानि सर्वोच्च्येनाधिकानि च ॥ २८८
तदूर्ध्वस्थं गृहोच्छ्रायं कुम्भ्यादिपरिकल्पितम् ।
पादोर्ध्वे यावता भक्तं दशधा तानथ ब्रुधे(? बे) ॥ २८९
तत्र भागमिता कुम्भी स्तम्भः षड्भागसंमितः ।
उच्छालकं ऊनमतो लुम्बिका तावती भवेत् ॥ २९०
स एव सरली लोके कथ्यते शीर्षपट्टिका ।
ऊनमूर्ध्वे शिरः कार्यं पट्टभागमितं भवेत् ॥ २९१
वैजयन्ती तुला प्रोक्ता लुम्बिका स्यात् तदासने ।
पादोनमिता श्रोणिमिता स्थाने स्थाने मनोरमाः ॥ २९२
तदूर्ध्वे कार्यते शीर्षं तत्र पादमितोच्छ्रयम् ।
स्थापनीयंत(? यास्त)दूर्ध्वस्था वैजयन्त्यस्तु सर्वशः ॥ २९३
स्तम्भा विस्तारतः कार्या[ः] सार्द्धवेदमिता वराः ।
दैर्ध्ये सत्शीर्षपद्मस्तु व्यासे स्तम्भमिताः समाः ॥ २९४
व्यासपादेन हीना वा दैर्ध्ये पादेन वाधिकाः ।
उच्छलिका बहिः कार्या लुम्बिकास्त्वन्यतः समाः ॥ २९५
हीरग्रहणकं दैर्ध्ये युगलं शीर्षपट्टिकाः ।
स्तम्भादपि शरव्यांशे व्यासः स्यादत्र संमतः ॥ २९६
तदग्रे कुमुदाकारमुपान्त्ये वक्रिकासनम् ।
लुम्बिकापेक्षया तस्मिन् भद्रकोणजलान्तरम् ॥ २९७
चतुरस्रं भवेच्छेषं चित्रितं पल्लवादिभिः ।
भूमीभुजां गृहे कार्यं मण्डपाद्यं तथा शृणु ॥ २९८
उच्छालकोपरि न्यस्ता लुम्बिका पूर्वकल्पिता ।
मदली चोर्ध्वतो दिक्षु कार्या भागोच्छ्र(! छ्रि) ता वरा ॥ २९९
सांह्रिभागमिता सार्द्धभागतुल्याथवा मता ।
स्तम्भोपरि न्यसेत् स्तम्भं समं व्यासेन पूर्वतः ॥ ३००
निर्व्यूहकं च तस्योर्द्धे कर्त्तव्यं मानकल्पितम् ।
वक्रानिर्व्यूहकं चैव भूयो भूयः प्रकल्पयेत् ॥ ३०१

मौलिकानैव विधिना कर्त्तव्यास्ता महोदये ।
ऊर्ध्वे पट्टं तु(? सु)शोभाढ्यं कर्त्तव्यं पूर्वकल्पितम् ॥ ३०२

राजद्वारे तथा राजगृहे सन्मण्डपोदये ।
निर्व्यूहयुगलं पट्टं युगलं च तथा भवेत् ॥ ३०३

अथवा पादयोर्युग्मं कर्त्तव्यं केवलं बुधैः ।
उपर्युपरि कर्त्तव्यं मालाढ्यं पूर्ववद् भवेत् ॥ ३०४

कपोतीपालिका युक्ता कुम्भी राजगृहे शुभाः ।
स्तम्भोच्छालकः कर्त्तव्यो भद्रपल्लवसंयुतः ॥ ३०५

विधिनानेन रचितं गृहं सर्वार्थसिद्धिदम् ।
मनोहरेण रचितं शाकादीष्टेन दारुणा ॥ ३०६

ज्योतिःशास्त्रोदिते लग्ने मुहूर्त्ते सद्गुणान्विते ।
शिल्पिना शास्त्रतः कार्यं गृहमैश्वर्यदं शुभम् ॥ ३०७

प्रमाणमञ्जरी सेयं नाम्ना सर्वोपकारिणी ।
यस्या विज्ञानमात्रेण बुद्धिहीनोऽपि सिध्यति ॥ ३०८

श्रीमुञ्जभोजान्वय**भानु**भूपप्रसादपात्रं **नकुला**भिधानः ।
शिल्पी सुतस्तस्य चकार शास्त्रं **मल्ला**भिधः सत्क्रियते नितान्तम् ॥ ३०९

॥ इति श्रीसूत्रधारमल्लविरचिता प्रमाणमञ्जरी संपूर्णा ॥

॥ १९४९ ना मार्गशिर शुदि ९ । लि । पं । हीमतविजय ॥ श्रीशिल्पग्रंथोऽयं । पाट्टणनगरे ।

APPENDIX I

List of other works treating the similar subject—

Āgāra-Vinoda—On the construction of houses.

(Aufrecht *ibid.*, Part I, p. 2).

Kriyā-Saṁgraha-Pañjikā—a catalogue of rituals by Kuladatta. It contains among other things instructions for the selection of site for the construction of a Nihāra and also *rules for building a dwelling house.*

(The Sanskrit and Buddhist Literature of Nepal, by Rajendra Lal Mitra, 1882, p. 105).

Gṛha-Nirūpaṇa-Saṁkṣepa—A summary-work on house-building.

(Aufrecht, *ibid.*, Part I, p. 157).

Gṛha-Nirmāṇa-Vidhi—On rules for the erection of houses, temples and other edifices.

(Wilson's Mackenzie Collection, p. 304).

Gṛha-Pīṭhikā—On the construction of houses.

(Oppert's List of Sanskrit Mss. in Private Libraries of South India, Vol. I, p. 545).

Tachchu-Śāstra—Same as *Manuṣyālaya Candrikā.*

Dhruvādi-ṣoḍaśa-Gehāni—Attributed to Gaṇapati—On the architectural arrangement of buildings.

(See Vāstu-Sāraṇī).

Pakṣi-Manuṣyālaya-Lakṣaṇa—On the construction of human dwellings and aviaries.

(Oppert's List of Sanskrit Mss., *ibid,* Vol. I, p. 471).

Prāsāda-Kalpa—On the construction of buildings.

(Oppert's List of Sanskrit Mss., *ibid,* Vol. II, p. 522).

Prāsāda-Lakṣaṇa—On buildings.

(Oppert's List of Sanskrit Mss., *ibid.*, Vol. I, p. 473).

Manuṣyālaya-Candrikā (Also called Tachchu-Śāstra)—deals with measurement, etc., concerning private dwelling houses as distinguished from religious, temples, and military forts, etc. It contains 65 stanzas and a Malayalam translation. There is a manuscript also bearing the same title.

(Oppert's List of Sanskrit Mss., *ibid,* Vol. I, p. 475).

Manuṣyālaya-Lakṣaṇa—On the building of human dwellings.

(In possession of the Mahārājā of Travancore; Oppert's List of Sanskrit Mss., *ibid,* Vol. I, p. 475).

Viśvakarma-Prakāśa—also called—Vāstu-Śāstra—It gives a course of directions in thirteen chapters, on the building of houses, the making of roads, tanks, etc. and the rites observed on such occasions.